संस्कृत-वार्ता:

30.04.2024

सायम् - 06:20

मुख्यवार्ता:-

- प्रधानमन्त्री तथा भाजपा-दलस्य वरिष्ठनेता नरेन्द्रमोदी अद्य उक्तवान् यत् एनडीए-सर्वकारेण विगतदशवर्षेषु पञ्चविंशतिः-कोटिजना: दरिद्रतायाः बहिः निष्कासिता:।
- काङ्ग्रेसस्य वरिष्ठनेत्रा राहुलगान्धिना आश्वस्तं यत् यदि तस्य दलं विजित्य सत्तायां आगमिष्यति तर्हि महिलानां यूनां च कृते आर्थिकसहायतायोजनाः आरप्स्यन्ते ।
- एड्मिरल् दिनेशकुमार-त्रिपाठी अद्य नौसेनाप्रमुख-पदं स्वीकृतवान्।
- छत्तीसगढराज्यस्य बस्तर संभागे न्यूनानिन्यूनं सप्त-माओवादि-आततायिन: मारिता:।
- भारतस्य ऋतुविज्ञानविभागेन पूर्वभारते मईमासस्य द्वितीयदिनांक-पर्यन्तं तीव्र-तापतरङ्गस्य स्थितिः निरन्तरं भविष्यति इति पूर्वानुमानं कृतम् अस्ति।
- आईपीएल इति क्रिकेट-प्रतिस्पर्धा-मालिकायाम् अद्य लखनऊ सूपर- जाइण्ट्स् अथ मुम्बई इण्डियन्स् दलयोर्मध्ये संघर्षः लखनऊ नगरे भविष्यति ।

मोदी-निर्वाचनप्रचारः

प्रधानमन्त्री तथा भाजपा-दलस्य वरिष्ठनेता नरेन्द्रमोदी अद्य उक्तवान् यत् जनाः मोदीसर्वकारस्य दश-वर्षाणां काङ्ग्रेसशासनस्य षष्टिः वर्षाणां च अन्तरं पश्यन्ति। महाराष्ट्रस्य माधानगरे जनसभां सम्बोधयन् सः अवदत् यत् यदा काङ्ग्रेसशासनकाले ये प्रधानमन्त्रिणः भवन्ति स्म ते, गरीबी हटायेंगे इति वाक्यं जपन्ति स्म, परन्तु एनडीए-सर्वकारेण विगतदशवर्षेषु पञ्चविंशतिः- कोटिजना: दरिद्रतायाः बहिः निष्कासिता:। श्रीमोदी अवदत् यत् चतुर्दशोत्तर-द्विसहस्र-तमे वर्षे प्रायः शतम् सिञ्चनपरियोजनानि दशकेभ्यः अवरुद्धाः आसन् । तेषु त्रिषष्टि-परियोजनानि एनडीए-सर्वकारेण निष्पादितानि एव। एन्.सी.पी-प्रमुखस्य शरदपवारस्य उपरि वाक्-प्रहारं कुर्वन् श्रीमोदी अवदत् यत् यदा पवारमहोदयः केन्द्रे कृषिमन्त्री आसीत् तदा इक्षोः उचितं देय-मूल्यं द्विशतम् रूप्यकाणि आसीत् किन्तु एनडीए-शासनस्य दशवर्षेषु इक्षोः एफआरपी-इति-मूल्यं प्रतिक्विन्टल-परिमितं चत्वारिंशदुत्तर-त्रिशतम् रूप्यकाणि यावत् वर्धितम् अस्ति।

काङ्ग्रेसस्य वरिष्ठनेता राहुलगान्धी

काङ्ग्रेसदलस्य वरिष्ठनेत्रा राहुलगान्धिना आश्वस्तं यत् यदि तस्य दलं विजित्य सत्तायां आगमिष्यति तर्हि महिलानां यूनां च कृते आर्थिकसहायतायोजनाः आरप्स्यन्ते । अद्य मध्यप्रदेशस्य भिण्ड-क्षेत्रे सभां सम्बोधयन् सः आरोपितवान् यत् भाजपादलं निर्धनजनानाम् हितविरुद्धं कार्यं करोति ।

## एड्मिरल् दिनेशकुमार त्रिपाठी

एड्मिरल् दिनेशकुमार-त्रिपाठी अद्य नौसेनाप्रमुख-पदं स्वीकृतवान्। एषः आर-हरिकुमारस्य उत्तराधिकारी अस्ति । प्रभारं स्वीकृत्य नवदिल्लीनगरे पत्रकारैः सह वार्तालापं कुर्वन् एड्मिरल् त्रिपाठी अवदत् यत्, समुद्रे सम्भाव्यविरोधिनः शान्तिपूर्वकं निवारयितुं समुद्रे, समुद्रात् च युद्धे विजयं प्राप्तुं भारतीयनौसेना सर्वदा कार्यात्मकरूपेण सज्जा एव तिष्ठेत्। तेन सबलं प्रतिपादितं यत् प्रौद्योगिकीनां प्रयोगपूर्वकं, राष्ट्रियविकासस्य महत्त्वपूर्णस्तम्भश्च भूत्वा 'आत्मनिर्भरताम्' दिशि भारतीयनौसेनायाः सतत-प्रयत्नान् सुदृढीकरिष्यति । त्रिपाठीवर्यः पश्चिमनौसेनाकार्यक्षेत्रस्य मुख्य-ध्वजाधिकारीरूपेण कार्यं कृतवान् अस्ति। संचार-विद्युत्-युद्ध-विशेषज्ञः सः नौसेनायाः अग्रपङ्क्ति-युद्धपोतेषु संकेत-सञ्चार-अधिकारी तथा विद्युदीय-युद्ध-अधिकारी इति रूपेण, अनन्तरं च मार्गदर्शित-मिसाइल-विध्वंसकस्य INS मुम्बई-इत्यस्य कार्यकारी-अधिकारी, प्रधान-युद्ध-अधिकारी-रूपेण च कार्यं कृतवान् । सः भारतीयनौसेनायाः विनाश, किर्च, त्रिशूलनौकानां आज्ञाधीकारी च आसीत् । एड्मिरल् त्रिपाठीवर्यः कर्तव्यनिष्ठायाः अतिविशिष्टसेवापदकेन नौसेनापदकेन च विभूषितः अस्ति ।

## छत्तीसगढ माओवादिनाय् वधः

छतीसगढराज्यस्य बस्तर संभागे न्यूनानिन्यूनं सप्तमाओवादि-आततायिन: मारिता: सन्ति, येषु द्वे महिलाविद्रोहिण्यौ अपि आस्ताम्। आरक्षिकर्मीभि: प्रोक्तं यत् संघर्षोऽयं अबूझमाड़क्षेत्रस्य वनेषु नारायणपुरजनपदे अजायत। अत्र माओवादिनां संभाव्यताया: गुप्तसूचनानन्तरम् आरक्षिभि: साफल्यमिदं लब्धमिति।

## गृहमन्त्री-अमितशाहः

पश्चिमबङ्गस्य संदेशखाली-प्रसङ्गे ये सर्वेऽपि सम्बद्धाः सन्ति तेषां विरुद्धं कठोर-कार्याचरणं विधास्यते इति भाजपा-वरिष्ठनेता केन्द्रीयमन्त्री श्री-अमितशाहः अवदत् । अद्य बर्धामन-पुरबा-लोकसभा-क्षेत्रे जनसभां सम्बोधनं कुर्वन् श्री-शाहः अवदत् यत् पश्चिमबङ्गदेशे अवैध-प्रवेशः महती समस्या अस्ति। सः टीएमसी इत्यस्य दलस्य उपरि आरोपं कृतवान् यत् तद्दलं मतदानार्थम् अवैधरूपेण प्रविष्ट-विदेशीयानामुपरि निर्भरं भवति। सः आश्वासनं दत्तवान् यत् भाजपादलं पश्चिमबङ्गं विकासस्य दृष्ट्या प्रथमक्रमाङ्कस्य राज्यं करिष्यति।

## सर्वोच्च-न्यायालयः

सर्वोच्चन्यायालयेन कामुक-कुकृत्य-पीडितायाः विषयक-पूर्वकृतादेशः प्रत्यावर्तितः। पूर्वं चतुर्दश-वर्षीयायाः कुकृत्य-पीडितायाः बालिकायाः प्रायः त्रिंशत्-सप्ताहात्मकस्य भ्रूणगर्भस्य समाप्तिः कर्तुं अनुमतिः प्रदत्ता आसीत् । पितृभ्यां, तस्याः स्वास्थ्यस्य विषये चिन्ता-प्रकटनात् अनन्तरम् उक्तनिर्णयः स्वीकृतः । भारतस्य मुख्यन्यायाधीशौ डी. वाई. चन्द्रचूडः जे. बी. परदीवालश्च बालिकया सह संवादं कृत्वा बालिकायाः रुचिः सर्वोपरि इति विचार्य स्वनिर्णयं परिवर्तितवन्तौ ।

## विदेशसचिवः विनय क्वात्रः

विदेशसचिवः विनय-क्वात्रः अद्य नवीनदिल्लीनगरे संयुक्त-अरब-अमीरातस्य अन्ताराष्ट्रिय-सहकारमन्त्रिणा रीम-अल-हाशिमी इत्यनेन सह मिलितवान्। अस्मिन् सत्रे तौ बहुपक्षीय-द्विपक्षीय-सम्बन्धानां विस्तृतसमीक्षां कृतवन्तौ अथ भारत-संयुक्त-अरब-अमीरातयोः व्यापक-रणनीतिक-सहभागितायाः प्रगाढीकरणार्थम् करिष्यमाणोपायानां विषये अपि चर्चां कृतवन्तौ।

## मणिपुर-पुनर्निर्वाचनम्

बाह्य-मणिपुर-संसदीय-निर्वाचन-क्षेत्रस्य षट्-मतदान-केन्द्रेषु पुनर्मतदानं प्रचलति । अतः पूर्वं निर्वाचनप्राधिकरणेन मणिपुरे अद्य बाह्य-मणिपुर-संसदीय-क्षेत्रस्य षट् मतदानकेन्द्रेषु पुनर्मतदानं कर्तुं सर्वाणि मापनानि कृतानि । मतदानम् अद्य प्रातः सप्तवादनतः आरब्धम् ।

## यूजीसी नेट

विश्वविद्यालयानुदानायोगस्य राष्ट्रिय-पात्रता-परीक्षा यूजीसीनेट इति साम्प्रतं जूनमासस्य अष्टादशदिनांके आयोजयिष्यते । पूर्वम् इयं परीक्षा जून-मासस्यैव षोडशदिनांके निर्धारिता आसीत्, विश्वविद्यालय-अनुदान-आयोगेन अभ्यर्थिनां प्राप्तप्रतिपुष्टिप्रक्रियानन्तरं अयं निर्णयः स्वीकृतः । इयं परीक्षा एकस्मिन्नेव दिवसे ओ.एम्. आर. पद्धत्या भविष्यति।

## गुरू तेग बहादुर प्रकाश पर्व

प्रधानमन्त्री नरेन्द्रमोदी श्रीगुरूतेगबहादुरवर्यस्य प्रकाशपर्वणि सश्रद्धम् अनमत्। एकस्मिन् सामाजिक-प्रसारतन्त्र-जाले प्रसारिते सन्देशे श्रीमोदिना भणितं यत् आसंसारं लक्षश: जना: साहस-करूणा-निस्वार्थतायाश्च अवताररूपेण तस्य स्मरणं कुर्वन्ति। प्रधानमन्त्रिणा प्रोक्तं यत् गुरुतेगबहादुरवर्यस्य जीवनम् एकस्य मार्गदर्शकस्य रूपेण कार्यं करोति। तेन अग्रे उक्तं यत् श्रीतेगबहादुरवर्यस्य न्यायं प्रति, सर्वजनानाम् अधिकाररक्षां प्रति च सुदृढा प्रतिबद्धता, तस्य महानताया: प्रमाणमस्ति। प्रधानमन्त्रिणा उक्तं यत् अत्याचारोत्पीडनयो: साम्मुख्यं तेन निर्भीत्या निष्पक्षतया च कृतम् ।

## आईएमएफ पाकिस्तानदेश:

अन्ताराष्ट्रिय-वित्तनियन्त्रण-संघेन पाकिस्तानदेशाय दशमलव-एकोत्तरैकाब्ज- डॉलरमितम् ऋणानुमोदितमस्ति। नवीनतममिदं वित्तपोषणं संघेनानेन तृतीयांशत्वेन प्रदीयते।

## ऋतुविज्ञान

भारतस्य ऋतुविज्ञानविभागेन पश्चिमबङ्ग, ओडिशा, बिहार, झारखण्डसहित पूर्वभारतेषु मई-मासस्य द्वितीयदिनांकपर्यन्तं तापतरङ्गतः तीव्रतापतरङ्गस्य स्थितिः निरन्तरं भविष्यति इति पूर्वानुमानं कृतम् अस्ति। दक्षिणभारते आगामिषु पंचदिवसेषु तेलङ्गाना, कर्नाटक, आन्ध्रप्रदेश, केरल, तमिलनाडु, पुडुचेरी इत्यादीनां केषुचित् भागेषु उष्ण-आर्द्र-वायु-सहिता: उष्ण-तरङ्ग-स्थितयः प्रचलन्ति| आगामिदिनद्वये वायव्यभारते अधिकतमं तापमानं २ तः ३ डिग्री सेल्सियसपर्यन्तं न्यूनीभवति इति ऋतुविज्ञानविभागेन पूर्वानुमानं कृतम् अस्ति । किन्तु मध्यभारते एषा स्थिति: विपरिता भविष्यति।

## आई.पी.एल.

इंडियन प्रीमियर लीग इत्याख्यायां क्रिकेट-प्रतिस्पर्धा-मालिकायाम् अद्य लखनऊ सूपर-जाइण्ट्स् अथ मुम्बई इण्डियन्स् दलयोर्मध्ये संघर्षः लखनऊ नगरस्य एकाना क्रिकेट् क्रीडांगणे सायं सार्धसप्तवादने भविष्यति ।

।। इति वार्ता: ।।